This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection


कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र. M 2252 विषय स्तोत्र
नाव शिव कवच (मुद्रित)
लेखक / लिपीकार —
पृष्ठ 07 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ शिवकवचप्रारंभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ अस्य श्रीशिवकवचस्तोत्रमंत्रस्य ब्रह्मा ऋषिः॥ अनुष्टुप् छंदः। श्रीसदाशिवरुद्रो देवता। ह्रीं शक्तिः। रं कीलकम्। श्रीं ह्रीं क्लीं बीजम्। श्री-सदाशिवप्रीत्यर्थंशिवकवचस्तोत्रजपे विनियोगः।अथन्यासः। ॐनमो भगवते ॥ ज्वलज्ज्वालामालिने। ॐह्रां सर्वशक्ति धाम्ने ईशानात्मने अंगुष्ठाभ्यां नमः। ॐनमो भगवते ज्वलज्ज्वालामलिने। ॐ नं रिं नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नमः। ॐ नमो भगवते ज्वलज्ज्वालामालिनेॐ मं रुं अनादि-शक्तिधाम्ने अघोरात्मने मध्यमाभ्यां नमः। ॐनमो भगवते ॥ ज्वलज्ज्वलामालिने ॐ शिं रैं स्वतंत्रश-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नमः।ॐनमो
भगवते ज्वलज्ज्वालामालिने ॐवां रौं अलुप्तशक्ति-
धाम्ने सद्योजातात्मने कनिष्ठिकाभ्यां नमः । ॐनमो
भगवते ज्वलज्ज्वालामालिने ॐयं रः अनादिशक्ति-
धाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां नमः। एवं हृद-
यादि न्यासः । अथ ध्यानम् । वज्रदंष्ट्रं त्रिनयनं का-
लकंठमरिंदमम् । सहस्रकरमत्युग्रं वंदे शंभुमुमापति-
म् ॥१॥ अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं प-
वित्रम् । जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं क-
वचं हिताय ते ॥२॥ ऋषभ उवाच । नमस्कृत्य महा-
देवं विश्वव्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्वर-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षाकरं नृणाम्॥३॥शुचौ देशे समासीनोयथावत्कल्पि
तासनः।जितेंद्रियोजितप्राणश्चिंतयेच्छिवमव्ययम्४
हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसाव्याप्तनभोवकाश
म्। अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं म-
हेशम्॥५॥ ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंद-
निमग्नचेताः।षडक्षरन्याससमाहितात्मा शैवेन कुर्या-
त्कवचेन रक्षाम्॥६॥मां पातु देवोऽखिलदेवतात्मा सं-
सारकूपे पतितं गभीरे॥तन्नाम दिव्यं वरमंत्रमूलं धुनो-
तु मे सर्वमघं हृदिस्थम्॥७॥सर्वत्र मां रक्षतु विश्वमूर्ति-
र्ज्योतिर्मयानंदघनश्चिदात्मा। अणोरणीयानुरुशक्ति-
रेकःस ईश्वरः पातु भयादशेषात्।८।यो भूस्वरूपेण बि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भर्तिं विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः॥योऽपांस्व-
रूपेण नृणां करोति संजीवनं सोऽवतु मां जलेभ्यः॥९॥
कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति
भूरिलीलः।स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीते-
रखिलाच्च तापात्॥१०॥प्रदीप्तविद्युत्कनकावभासो
विद्यावराभीतिकुठारपाणिः।चतुर्मुखस्तत्पुरुषस्त्रिने-
त्रः प्राच्यां स्थितं रक्षतु मामजस्रम्॥११॥कुठारवे-
दांकुशपाशशूलकपालदक्षाक्षगुणान्दधानः। चतुर्मु-
खो नीलरुचिस्त्रिनेत्रःपायादघोरो दिशि दक्षिणस्याम्
॥१२॥कुंदेंदुशंखस्फटिकावभासो वेदाक्षमालावर-
दाभयांकः।त्र्यक्षश्चतुर्वक्त्रउरुप्रभावः सद्योधिजातो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽवतु मां प्रतीच्याम् ॥ १३ ॥ वराक्षमालाभयटंकह-
स्तः सरोजकिंजल्कसमानवर्णः ॥त्रिलोचनश्चारुचतु-
र्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १४॥ वेदा-
भयेष्टांकुशपाशटंककपालढक्काक्षकशूलपाणिः। सित-
द्युतिः पंचमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः
॥ १५ ॥ मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्या-
दथ भालनेत्रः ।नेत्रे ममाव्याद्भगनेत्रहारी नासां स-
दा रक्षतु विश्वनाथः ॥ १६ ॥ पायाच्छ्रुती मे श्रुतिगी-
तकीर्तिश्कपोलमव्यात्सततं कपाली। वक्त्रं सदा रक्ष-
तु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः॥१७॥कंठंगि-
रीशोऽवतु नीलकंठःपाणिद्वयं पातु पिनाकपाणिःदोर्मू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखांतकोऽव्या-
त् ॥ १८ ॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्या-
न्मदनांतकारी। हेरंबतातो मम पातु नाभिं पायात्क-
टीधूर्जटिरीश्वरो मे। १९॥ऊरुद्वयं पातु कुबेरमित्रो जा-
नुद्वयं मे जगदीश्वरोऽव्यात् । जंघायुगं पुंगवकेतुरव्या-
त्पादौ ममाव्यात्सुरवंद्यपादः ॥२०॥महेश्वरःपातु दि-
नादियामे मांमध्ययामेऽवतु वामदेवः।त्रिलोचनःपातु
तृतीययामे वृषध्वजःपातु दिनांत्ययामे ॥२१॥ पायां-
न्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे।
गौरीपतिःपातु निशावसाने मृत्युंजयो रक्षतु सर्वका-
लम् ॥२२॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः स-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दा पातु बहिःस्थितं माम् । तदंतरे पातु पतिः पशूनां
सदाशिवो रक्षतु मां समंतात् ॥ २३ ॥ तिष्ठंतमव्या-
द्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः । वेदांतवे-
द्योऽवतु मां निषण्णं मामव्ययःपातु शिवः शयान-
म् ॥ २४ ॥ मार्गेषु मां रक्षतु नीलकंठःशैलादिदुर्गेषु पु-
रत्रयारिःअरण्यवासादिमहाप्रवासे पायान्मृगव्याध-
उदारशक्तिः॥२५॥ कल्पांतकाटोपपटुप्रकोपस्फुटा-
ट्टहासोच्चलिताण्डकोशः । घोरारिसेनार्णवदुर्निवारम
हाभयाद्रक्षतु वीरभद्रः ॥२६॥ पत्त्यश्वमातंगरथावरू-
थसहस्रलक्षायुतकोटिभीषणम्।अक्षौहिणीनांशतमा-
तताियिनां छिंद्यान्मृडो घोरकुठारधारया॥२७॥निहंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्याशा-
र्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुःपिनाकः।
॥२८॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्य-
सनदुःसहदुर्यशांसि । उत्पाततापविषभीतिमसद्ग्रहा-
र्तिं व्याधींश्च नाशयतु मे जगतामधीशः ॥ २९ ॥ ॐ
नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्व-
मंत्रस्वरूपाय सर्वमंत्राधिष्ठितायसर्वतंत्रस्वरूपाय स
र्वतत्त्वविदूराय ब्रह्मरुद्रावतारिणे नीलकंठाय पार्वती-
मनोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलित-
विग्रहाय महामणिमुकुटधारणाय माणिक्यभूषणाय
सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंस-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वा-
तीताय गंगाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदां-
तसाराय त्रिवर्गसाधनायानंतकोटिब्रह्माण्डनायका-
यानंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहाप-
द्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय चिदा-
काशायाकाशादिक्स्वरूपाय ग्रहनक्षत्रमालिने सकला
य कलंकरहिताय सकललोकैककर्त्रे सकललोकैकभर्त्रे
सकललोकैकसंहर्त्रे सकललोकैकगुरवे सकललोकैक-
साक्षिणे सकलनिगमगुह्याय सकलवेदांतपारगाय स-
कललोकैकवरप्रदाय सकललोकैकशंकराय शशांकशे
खराय शाश्वतनिजावासाय निराभासायनिरामयाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्मलाय निर्लोभाय निर्मदाय निश्चिताय निरहं-
काराय निरंकुशाय निष्कलंकाय निर्गुणाय निष्का-
माय निरुपप्लवाय निरवद्याय निरंतराय निष्कारणा-
य निरातंकाय निष्प्रपंचाय निःसंगाय निर्द्वंद्वाय निरा
धाराय नीरागाय निष्क्रोधाय निर्मलाय निष्पापाय
निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तु-
लाय निःसंशयाय निरंजनाय निरुपमविभवाय नि-
त्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतस्वरू
पाय तेजोरूपाय तेजोमयाय जय जय रुद्र महारौद्र
भद्रावतार महाभैरव कालभैरव कल्पांतभैरव कपाल
मालाधर खट्वांगखड्गचर्मपाशांकुशडमरुशूलचापबा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णगदाशक्तिभिंदिपालतोमरमुसलमुद्गरपाशपरिघभु-
शुंडीशतघ्नीचक्राद्यायुधभीषणकरसहस्रमुख दंष्ट्राकरा
लवदन विकटाट्टहासविस्फारितब्रह्मांडमंडल नागेंद्र-
कुंडल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय
त्र्यंबक त्रिपुरांतक विश्वरूप विरूपाक्ष विश्वेश्वर वृष-
भवाहन विश्वतोमुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल
महामृत्युमपमृत्युभयं नाशय नाशय चोरभयमुत्साद
योत्सादय विषसर्पभयं शमय शमय चोरान्मारय
मारय मम शत्रूनुच्चाटयोच्चाटय त्रिशूलेन विदारय
विदारय कुठारेण भिंधि भिंधि खड्गेन छिंधि छिंधि ॥६॥
खट्वांगेन विपोथय विपोथय मुसलेन निष्पेषय निष्पे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षय बाणैःसंताडय संताडय रक्षांसि भीषय भीषयाशे
षभूतानि विद्रावय विद्रावय कूष्मांडवेतालमारीगण-
ब्रह्मराक्षसगणान् संत्रासय संत्रासय ममाभयं कुरु कु-
रु वित्रस्तं मामाश्वासयाश्वासय नरकमहाभयान्मा-
मुद्धरोद्धर संजीवय संजीवय क्षुत्तृड्भ्यां मामाप्याय-
याप्यायय दुःखातुरं मामानंदयानंदय शिवकवचेन
मामाच्छादयाच्छादय मृत्युंजय त्र्यंबक सदाशिव न-
मस्ते नमस्ते । ऋषभ उवाच॥इत्येतत्कवचं शैवं वर-
दं व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं सर्वदेहि-
नाम्॥३०॥यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।
न तस्य जायते क्वापि भयं शंभोरनुग्रहात् ॥३१॥ क्षी-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा। सद्यःसुखम-
वाप्नोति दीर्घमायुश्च विंदति ॥३२॥ सर्वदारिद्र्यशमनं
सौमंगल्यविवर्धनम्।यो धत्ते कवचं शैवं स देवैरपि पू-
ज्यते ॥३३॥ महापातकसंघातैर्मुच्यते चोपपातकैः।
देहांते मुक्तिमाप्नोति शिववर्मानुभावतः ॥३४॥त्वमपि
श्रद्धया वत्स शैवं कवचमुत्तमम्। धारयस्व मया दत्तं
सद्यः श्रेयोह्यवाप्स्यसि॥ ३५॥सूतउवाच। इत्युक्त्वा
ऋषभो योगी तस्मै पार्थिवसूनवे॥ददौ शंखं महारावं
खड्गं चारिनिषूदनम् ॥ ३६ ॥ पुनश्च भस्म संमंत्र्य
तदंगं परितोऽस्पृशत्। गजानां षट्सहस्रस्य द्विगुण-
स्य बलं ददौ॥३७॥ भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.12.19 16:08
,TRANSFERRED=2019/12/13 at 16:10:55
,PAGES=15
,TYPE=STD
,NAME=S0002342
,Book Name=M-2252-SHIV KAVACH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection